# Shrigurukavacham

# શ્રીગુરુકવચમ્

## Document Information

Text title : gurukavachaM

File name : gurukavacham.itx

Category : kavacha, deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : PP, DPD

Proofread by : PP, DPD

Description-comments : from Kalyan-Mandir magazine purashcharaNarasollAse

Latest update : August 16, 2014, July 19, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીગુરુકવચમ્

॥ અથ પુરશ્ચરણરસોલ્લાસે ઈશ્વરદેવીસંવાદે શ્રીગુરુકવચમ્ ॥

પૂર્વપીઠિકા

॥ શ્રીઈશ્વર ઉવાચ ॥

શ ृणु દેવિ! પ્રવક્ષ્યામિ ગુહ્યાદ્ગુહ્યતરં મહત્ ।
લોકોપકારકં પ્રશ્નં ન કેનાપિ કૃતં પુરા ॥ ૧॥

અદ્ય પ્રભૃતિ કસ્યાપિ ન ખ્યાતં કવચં મયા ।
દેશિકાઃ બહવઃ સન્તિ મન્ત્રસાધનતત્પરાઃ ॥ ૨॥

ન તેષાં જાયતે સિદ્ધિઃ મન્ત્રૈર્વા ચક્રપૂજનૈઃ ।
ગુરોર્વિધાનં કવચમજ્ઞાત્વા ક્રિયતે જપઃ ।
વૃથાશ્રમો ભવેત્ તસ્ય ન સિદ્ધિર્મન્ત્રપૂજનૈઃ ॥ ૩॥

ગુરુપાદં પુરસ્કૃત્ય પ્રાપ્યતે કવચં શુભમ્ ।
તદા મન્ત્રસ્ય યન્ત્રસ્ય સિદ્ધિર્ભવતિ તત્ક્ષણાત્ ।
સુગોપ્યં તુ પ્રજપ્તવ્યં ન વક્તવ્યં વરાનને ॥ ૪॥

॥ સવિધિ શ્રીગુરુકવચસ્તોત્રમ્ ॥

વિનિયોગઃ –
ૐ નમોऽસ્ય શ્રીગુરુકવચનામમન્ત્રસ્ય પરમબ્રહ્મ ઋષિઃ
સર્વવેદાનુજ્ઞો દેવદેવો શ્રી આદિશિવઃ દેવતા નમો હસૌં
હંસઃ હ-સ-ક્ષ-મ-લ-વ-ર-યૂં સોऽહં હંસઃ બીજં
સ-હ-ક્ષ-મ-લ-વ-ર-યીં શક્તિઃહંસઃ સોऽહં કીલકં
સમસ્તશ્રીગુરુમણ્ડલપ્રીત્યર્થે જપે વિનિયોગઃ ।

ઋષ્યાદિન્યાસઃ –
શ્રીપરમબ્રહ્મર્ષયે નમઃ શિરસિ । સર્વવેદાનુજ્ઞદેવદેવ

શ્રી આદિશિવદેવતાયૈ નમઃ હૃદિ । નમઃ હસૌં હંસઃ
હ-સ-ક્ષ-મ-લ-વ-ર-યૂં સોઽહં હંસઃ બીજાય નમઃ ગુહ્યે ।
સ-હ-ક્ષ-મ-લ-વ-ર-યીં શક્તયે નમઃ નાભૌ । હંસઃ સોઽહં
કીલકાય નમઃ પાદયોઃ । સમસ્તશ્રીગુરુમણ્ડલપ્રીત્યર્થે જપે વિનિયોગાય
નમઃ અઞ્જલૌ ।

અથ ષડઙ્ગન્યાસઃ ।
ૐ હસામ્ । ૐ હસીમ્ । ૐ હસૂમ્ । ૐ હસૈમ્ । ૐ હસૌમ્ । ૐ હસઃ ।

અથ કરન્યાસઃ ।
ૐ હસાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હસીં તર્જનીભ્યાં નમઃ ।
ૐ હસૂં મધ્યમાભ્યાં નમઃ ।
ૐ હસૈં અનામિકાભ્યાં નમઃ ।
ૐ હસૌં કનિષ્ઠાભ્યાં નમઃ ।
ૐ હસઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અથ અઙ્ગન્યાસઃ ।
ૐ હસાં હૃદયાય નમઃ ।
ૐ હસીં શિરસે સ્વાહા ।
ૐ હસૂં શિખાયૈ વષટ્ ।
ૐ હસૈં કવચાય હું ।
ૐ હસૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હસઃ અસ્ત્રાય ફટ્ ।

ધ્યાનમ્ –
શ્રીસિધ્દ્ધમાનવમુખા ગુરવઃ સ્વરૂપં
સંસારદાહશમનં દ્વિભુજં ત્રિનેત્રમ્ ।
વામાઙ્ગશક્તિસકલાભરણૈર્વિભૂષં
ધ્યાયેજ્જપેત્ સકલસિદ્ધિફલપ્રદં ચ ॥

માનસપૂજન –
લં પૃથિવ્યાત્મકં ગન્ધતન્માત્રપ્રકૃત્યાત્મકં ગન્ધં
સશક્તિકાય શ્રીગુરવે સમર્પયામિ નમઃ ।
હં આકાશાત્મકં શબ્દતન્માત્રપ્રકૃત્યાત્મકં પુષ્પં

સશક્તિકાય શ્રીગુરવે સમર્પયામિ નમઃ ।
યં વાય્વાત્મકં સ્પર્શતન્માત્રપ્રકૃત્યાત્મકં ધૂપં
સશક્તિકાય શ્રીગુરવે ઘ્રાપયામિ નમઃ ।
રં વહ્ન્યાત્મકં રૂપતન્મત્રપ્રકૃત્યાત્મકં દીપં
સશક્તિકાય શ્રીગુરવે સમર્પયામિ નમઃ ।
વં અમૃતાત્મકં રસતન્માત્રપ્રકૃત્યાત્મકં નૈવેદ્યં
સશક્તિકાય શ્રીગુરવે સમર્પયામિ નમઃ ।
સં સર્વાત્મિકાં તામ્બૂલાદિસર્વોપચારપૂજાં
સશક્તિકાય શ્રીગુરવે સમર્પયામિ નમઃ ।

॥ કવચસ્તોત્રમ્ ॥

ૐ નમઃ પ્રકાશાનન્દનાથઃ તુ શિખાયાં પાતુ મે સદા ।
પરશિવાનન્દનાથઃ શિરો મે રક્ષયેત્ સદા ॥ ૧॥

પરશક્તિદિવ્યાનન્દનાથો ભાલે ચ રક્ષતુ ।
કામેશ્વરાનન્દનાથો મુખં રક્ષતુ સર્વધૃક્ ॥ ૨॥

દિવ્યૌઘો મસ્તકં દેવિ! પાતુ સર્વશિરઃ સદા ।
કણ્ઠાદિનાભિપર્યન્તં સિદ્ધૌઘા ગુરવઃ પ્રિયે ॥ ૩॥

ભોગાનન્દનાથ ગુરુઃ પાતુ દક્ષિણબાહુકમ્ ।
સમયાનન્દનાથશ્ચ સન્તતં હૃદયેઽવતુ ॥ ૪॥

સહજાનન્દનાથશ્ચ કટિં નાભિં ચ રક્ષતુ ।
એષ સ્થાનેષુ સિદ્ધૌઘાઃ રક્ષન્તુ ગુરવઃ સદા ॥ ૫॥

અધરે માનવૌઘાશ્ચ ગુરવઃ કુલનાયિકે!
ગગનાનન્દનાથશ્ચ ગુલ્ફયોઃ પાતુ સર્વદા ॥ ૬॥

નીલૌઘાનન્દનાથશ્ચ રક્ષયેત્ પાદપૃષ્ઠતઃ ।
સ્વાત્માનન્દનાથગુરુઃ પાદાઙ્ગુલીશ્ચ રક્ષતુ ॥ ૭॥

કન્દોલાનન્દનાથશ્ચ રક્ષેત્ પાદતલે સદા ।
ઇત્યેવં માનવૌઘાશ્ચ ન્યસેન્નાભ્યાદિપાદયોઃ ॥ ૮॥

ગુરુર્મે રક્ષયેદુર્વ્યાં સલિલે પરમો ગુરુઃ ।
પરાપરગુરુર્વહ્નૌ રક્ષયેત્ શિવવલ્લભે ॥ ૯॥

પરમેષ્ઠીગુરુશ્ચૈવ રક્ષયેત્ વાયુમણ્ડલે ।
શિવાદિગુરવઃ સાક્ષાત્ આકાશે રક્ષયેત્ સદા ॥ ૧૦॥

ઇન્દ્રો ગુરુઃ પાતુ પૂર્વે આગ્નેયાં ગુરુરગ્નયઃ ।
દક્ષે યમો ગુરુઃ પાતુ નૈરૃત્યાં નિઋતિર્ગુરુઃ ॥ ૧૧॥

વરુણો ગુરુઃ પશ્ચિમે વાયવ્યાં મારુતો ગુરુઃ ।
ઉત્તરે ધનદઃ પાતુ ઐશાન્યામીશ્વરો ગુરુઃ ॥ ૧૨॥

ઊર્ધ્વં પાતુ ગુરુર્બ્રહ્મા અનન્તો ગુરુરપ્યધઃ ।
એવં દશદિશઃ પાન્તુ ઇન્દ્રાદિગુરવઃ ક્રમાત્ ॥ ૧૩॥

શિરસઃ પાદપર્યન્તં પાન્તુ દિવ્યૌઘસિદ્ધયઃ ।
માનવૌઘાશ્ચ ગુરવો વ્યાપકં પાન્તુ સર્વદા ॥ ૧૪॥

સર્વત્ર ગુરુરૂપેણ સંરક્ષેત્ સાધકોત્તમમ્ ।
આત્માનં ગુરુરૂપં ચ ધ્યાયેન્ મન્ત્રં સદા બુધઃ ॥ ૧૫॥

॥ ફલશ્રુતિઃ ॥

ઇત્યેવં ગુરુકવચં બ્રહ્મલોકેઽપિ દુર્લભમ્ ।
તવ પ્રીત્યા મયા ખ્યાતં ન કસ્ય કથિતં પ્રિયે ॥ ૧॥

પૂજાકાલે પઠેદ્ યસ્તુ જપકાલે વિશેષતઃ ।
ત્રૈલોક્યદુર્લભં દેવિ । ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૨॥

સર્વમન્ત્રફલં તસ્ય સર્વયન્ત્રફલં તથા ।
સર્વતીર્થફલં દેવિ । યઃ પઠેત્ કવચં ગુરોઃ ॥ ૩॥

અષ્ટગન્ધેન ભૂર્જે ચ લિખ્યતે ચક્રસંયુતમ્ ।
કવચં ગુરુપઙ્ક્તેસ્તુ ભક્ત્યા ચ શુબવાસરે ॥ ૪॥

પૂજયેત્ ધૂપદીપાદ્યૈઃ સુધાભિઃ સિતસંયુતૈઃ ।
તર્પયેત્ ગુરુમન્ત્રેણ સાધકઃ શુદ્ધચેતસા ॥ ૫॥

ધારયેત્ કવચં દેવિ! ઇહ ભૂતભયાપહમ્ ।
પઠેન્મન્ત્રી ત્રિકાલં હિ સ મુક્તો ભવબન્ધનાત્ ।
એવં કવચં પરમં દિવ્યસિદ્ધૌઘકલાવાન્ ॥ ૬॥

॥ ઇતિ પુરશ્ચરણરસોલ્લાસે દ્વિતીયપ્રશ્ને દશમપટલે
ઈશ્વરદેવીસંવાદે શ્રીગુરુકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by PP, DPD

*Shrigurukavacham*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*